अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-403**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**

**बी. ए. व्याकरणम् (सत्रम् : चतुर्थम्)**

**संस्कृतम्**

**तृतीयपत्रम्-संस्कृतसाहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 75**

---

**अवधेयम्** : इदं प्रश्नपत्रं पञ्चसप्ततेः (७५) अङ्कानां विद्यते। अत्र खण्डत्रयं वर्त्तते। प्रत्येकं खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

**खण्डः क**

**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः**– 'क' खण्डे विकल्पसहिताः पञ्चप्रश्नाः प्रदत्ताः सन्ति, प्रत्येकं प्रश्नाय नवाङ्काः निर्धारिताः वर्तन्ते। **(5X9=45)**

**प्रश्नः1– अधोलिखितेषु गद्यपद्येषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कुरुत –** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)**– तपांस्यकालेष्वभिवाञ्छितानि
पुष्णन्ति नार्थान्मनसोऽनुकूलान्।
अकालगर्भा इव कन्यकाना –
मजातसारावयवाङ्गशोभा।।

**(ख)**– भवचारकसूकरास्तु बाला –
श्छलिताश्चित्तकलेर्विचेष्टितेन।
प्रपतन्ति सुखाभिलाषलुब्धा
व्यसनेष्वेव दुरन्तभैरवेषु।।

**(ग)**– ततौऽसौ ब्राह्मणस्तत्प्रचारावर्जितः जनितसौमनस्यो बलमित्रस्य गृहपतेर्निवेशनं प्रविश्य कन्याप्रतिलम्भतृष्णया ससम्भ्रमः स्वस्ति स्वस्तील्युवाच। गृहपरिजनः कथयति-ब्राह्मण! न भवद्भिक्षावेला। किं प्रार्थयसे? कन्याभिक्षाम्। कस्यार्थाय। श्रावस्त्यां मृगारो नामाग्रामात्यः। तस्य पुत्रो विशाखो नाम। त कथयन्ति सदृशमस्माकं तत्कुलम्। किं तर्हि? अतिविपकृष्टो देशः।

**प्रश्नः2– निम्नलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या विधेया–** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)**– यमं त्वेके मृत्युमतोऽन्यमाहुरात्मावसन्नममृतं ब्रह्मचर्यम्।
पितृलोके राज्यमनुशास्ति देवः शिवः शिवानामशिवोऽशिवानाम्।।

**(ख)**– तदर्थमुक्तं तप एतदिज्या ताभ्यामसौ पुण्यमुपैति विद्वान्।
पुण्येन पापं विनिहत्य पश्चात् संजायते ज्ञानविदीपितात्मा।।

**(ग)**– यतो न वेदा मनसा सहैनमनुप्रविशन्ति ततोऽथ मौनम्।
यत्रोत्थितो वेदशब्दस्तथायं स तन्मयत्वेन विभाति राजन्।।

**प्रश्नः3– अधोलिखितेषु पद्येषु कयोश्चिद् द्वयोः सप्रसङ्ग व्याख्या विधेया –** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)**– यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथन्न तनयाविश्लेषदुःखैर्नवैः।।

**(ख)–** रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः॥

**(ग)–** यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यसिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥

**प्रश्नः4– निम्नलिखितेषु कयोश्चिद् द्वयोः दोषयोः स्वरूपं सोदाहरणं स्पष्टीकुरुत –** **($4\frac{1}{2}+4\frac{1}{2}=09$)**

पदगतग्राम्यत्वम्। पदगतं सन्दिग्धत्वम्। सन्धिकष्टत्वम्। निहतार्थत्वम्।

**प्रश्नः5– निम्नाङ्कितेषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्यानं कुरुत –** **($4\frac{1}{2}+4\frac{1}{2}=09$)**

**(क)–** विसर्गे पुनर्वायवो नातिरूक्षाः प्रवान्ति, इतरे पुनरादाने, सोमश्चाव्याहतबलः शिशिराभिर्भाभिरापूरयज्जगदाप्याययति, अतो विसर्गः सौम्यः। आदानं पुनराग्नेयं तावेतावर्कवायू सोमश्च कालस्वभावमार्गपरिगृहीताः कालर्तुदोषबलनिर्वृत्तिप्रत्ययभूताः समुपदिश्यन्ते।

**(ख)–** मयूखैर्जगतः स्नेहं ग्रीष्मे पेपीयते रविः।
स्वादु शीतं द्रवं स्निग्धमन्नपानं तदा हितम्॥

**(ग)–** भूवाष्पमेघनिष्यन्दात् पाकादम्लाज्जलस्य च।
वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः॥

## खण्डः ख
### (लघूत्तरीयप्रश्नाः)

**निर्देशः–** 'ख' खण्डे विकल्पसहिताः पञ्चप्रश्नाः प्रदत्ताः सन्ति, प्रत्येकं प्रश्नाय पञ्चाङ्काः निर्धारिताः वर्तन्ते। केवलं पञ्च एव प्रश्नाः समाधेयाः। **(5X5=25)**

**प्रश्नः1–** सप्तराजकुमारिकावदानस्य सारः स्वशब्दैर्लेखनीयः।

***अथवा***

विशाखावृत्तस्य सारः संक्षेपतो लेखनीयः।

**प्रश्नः2–** सनत्सुजातीये प्रोक्तं मृत्युस्वरूपं वर्णयत।

***अथवा***

सनत्सुजातीयस्य विषयवस्तु संक्षेपेण लिखत।

**प्रश्नः3–** अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य कथा संक्षेपेण वर्णनीया।

***अथवा***

कण्वर्षिणा दुष्यन्ताय दत्तस्योपदेशस्य सारः लेखनीय।

**प्रश्नः4–** बन्धुभिः सादरं नेत्रैः पीयमानेव सा मुहुः।
सुताननेन्दुपूर्णाङ्का कार्त्तार्थ्यं लभतां कदा।
– इत्यस्मिन् श्लोके को नाम दोष इति स्पष्टीकुरुत।

***अथवा***

माधुर्यगुणस्य लक्षणं सोदाहरणं लिखत।

**प्रश्नः5–** हेमन्तर्तौ आहारविहारचर्या कीदृशी प्रोक्तेति स्वशब्दैर्लिखित।

***अथवा***

चरकसंहितानुसारं संवत्सरविभाग प्रदर्शयत।

## खण्डः – ''ग''

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः**– 'ग' खण्डे दश (10) वस्तुनिष्ठप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकं प्रश्नाय अर्धाङ्कः निर्धारितः वर्तते। सर्वे प्रश्नाः अनिवार्याः सन्ति। **(10X0.5=05)**

1. ''व्यसनान्धकारपटलः'' इत्यत्र को नामालङ्कारः?
   (अ) उपमा (ब) दीपकम्
   (स) उत्प्रेक्षा (द) रूपकम्
2. ''शिवारुतैः'' इत्यत्र ''शिवा'' शब्दस्य कोऽर्थः ?
   (अ) पार्वती (ब) हरीतकी
   (स) हरिद्रा (द) श्रृगाली
3. ''मिथ्यार्थयोगाभिहतान्तरात्मा'' इत्यत्र को नाम समासः?
   (अ) बहुब्रीहिः (ब) तत्पुरुषः
   (स) द्वन्द्वः (द) अव्ययीभावः
4. ''ब्रुवतः'' इत्यत्र को नाम प्रत्ययः?
   (अ) शतृ (ब) तसिल्
   (स) अच् (द) क
5. को नामोष्णोदकेन नवमालिकां सिञ्चति? – इति वाक्यं कः/का वदति?
   (अ) दुष्यन्तः (ब) अनसूया
   (स) प्रियम्वदा (द) शकुन्तला
6. ''अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव'' इत्यत्र को नामालङ्कारः?
   (अ) दीपकम् (ब) अतिशयोक्ति
   (स) उपमा (द) रूपकम्
7. ''हितु, नु, च'' वादीनां पादपूरणमात्रप्रयोजने सति को नाम दोषो भवति?
   (अ) दुःश्रवत्वम् (ब) निरर्थकत्वम्
   (स) अधिकपदत्वम् (द) निहतार्थत्वम्
8. ''कुञ्जं हन्ति कृशोदरी'' अत्र को नाम दोषः?
   (अ) निरर्थकत्वम् (ब) असमर्थत्वम्
   (स) अधिकपदत्वम् (द) दुःश्रवत्वम्
9. आदानकालः कथितः?
   (अ) सौम्यः (ब) आग्नेयः
   (स) वायव्यः (द) भैरवः
10. वायवो नातिरूक्षाः प्रवान्ति'' कुत्र ................
    (अ) आदानकाले (ब) विसर्गकाले
    (स) वसन्तकाले (द) शिशिरे

---------------x---------------